**Series : YXWZ4**

**SET ~ 4**

**प्रश्न-पत्र कोड**
**Q.P. Code** **49**

**रोल नं.**
**Roll No.**

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

**नोट / NOTE :**

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं।
Please check that this question paper contains **19** printed pages.

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **19** प्रश्न हैं।
Please check that this question paper contains **19** questions.

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।**
**Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

#

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयः : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

**General Instructions :**

*This question paper is divided into **5** (five) sections.*

*It has total **19** questions.*

**Section A** *– 1 Question no. 1*

**Section B** *– 2 Questions no. 2 to 3*

**Section C** *– 5 Questions no. 4 to 8*

**Section D** *– 9 Questions no. 9 to 17*

**Section E** *– 2 Questions no. 18 to 19*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

**सामान्य निर्देशा:**

अस्मिन् प्रश्नपत्रे **पञ्च** खण्डा: सन्ति ।

अस्मिन् प्रश्नपत्रे समेत्य नवदश **(19)** प्रश्ना: सन्ति ।

**खण्ड: 'क'** – अपठित-अवबोधनम् – 10 अङ्का:

**खण्ड: 'ख'** – रचनात्मक-कार्यम् – 10 अङ्का:

**खण्ड: 'ग'** – अनुप्रयुक्त-व्याकरणम् – 15 अङ्का:

**खण्ड: 'घ'** – (i) पठितावबोधनम् – 25 अङ्का:

(ii) संस्कृत-साहित्येतिहासस्य सामान्य: परिचय: – 10 अङ्का:

**खण्ड: 'ङ'** – छन्दोऽलङ्कार-परिचय: – 10 अङ्का:

**खण्ड: 'क'** – 1 – प्रश्नसंख्या 1 पर्यन्तम्

**खण्ड: 'ख'** – 2 – प्रश्नसंख्या 2 त: 3 पर्यन्तम्

**खण्ड: 'ग'** – 5 – प्रश्नसंख्या 4 त: 8 पर्यन्तम्

**खण्ड: 'घ'** – 9 – प्रश्नसंख्या 9 त: 17 पर्यन्तम्

**खण्ड: 'ङ'** – 2 – प्रश्नसंख्या 18 त: 19 पर्यन्तम्

- विशिष्टनिर्देशानुसारं प्रश्ना: समाधेया: ।
- उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।

## खण्डः 'क'

## अपठित-अवबोधनम्

## अपठित अवबोधन

## Unseen Reading Comprehension

*10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following passage and answer the given questions in Sanskrit.

भारतदेशः 1947 तमे वर्षे स्वतन्त्रोऽभवत्। तस्मिन् समये भारतस्य स्थितिः दयनीया आसीत्। तदा सर्वकारेण भारतस्य विकासाय क्रमबद्धाः लक्ष्याः निर्धारिताः। तस्मिन् समये भोजन-दारिद्र्य-स्वास्थ्य-शिक्षादयः प्रमुखसमस्याः आसन्। सर्वकारेण सर्व-क्षेत्रेषु विकासाय पञ्चवर्षीया योजना निर्मिता। भारते हरितक्रान्त्या औद्योगिकीकरणेन च विकासचक्रं तीव्रतया अचलत्। भारतवर्षः विकासशीलदेशः अभवत्। उदारीकरणेन, विदेशीनिवेशेन च भारतीय-अर्थव्यवस्थायाः प्रगतिः अभवत्। सूचना-प्रौद्योगिकीक्षेत्रे अपि विकासोऽभवत्। जनाः आजीविकाम् अलभन्। अद्यतनीयः सर्वकारोऽपि भारतवर्षस्य प्रगतिविषये सूक्ष्मदृष्ट्या चिन्तयति। वस्तुतः भारतस्य प्रगत्या सह एव भारतवासिनां प्रगतिः भवितुमर्हति। अलं विकासशीलेन भारतेन, भारतवर्षः विकसितः भवेत् इति अद्यतनीयस्य भारतसर्वकारस्य दृढं चिन्तनमस्ति। 2047 वर्षं यावत् भारतवर्षः विकसितानां देशानां श्रेण्यां भवेत् इति लक्ष्यं विधाय भारतसर्वकारेण उचितदिशायां योजनाः कार्यक्रमाः च प्रारब्धाः। सः दिवसः इदानीं दूरे नास्ति यदा भारतवर्षः विकसितः भविष्यति।

**प्रश्नाः**

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)

Answer in one word. (Only two questions) *2×1=2*

(i) स्वतन्त्रतायाः समये भारतवर्षस्य स्थितिः कीदृशी आसीत्?

(ii) औद्योगिकीकरणेन किं तीव्रतया अचलत्?

(iii) कः शीघ्रं विकसितः भविष्यति?

(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए। (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) *2×2=4*

(i) स्वतन्त्रतायाः समये प्रमुखसमस्याः काः आसन्?

(ii) भारतीय-अर्थव्यवस्थायाः प्रगतिः कथम् अभवत्?

(iii) भारतसर्वकारस्य दृढं चिन्तनं कीदृशम् अस्ति?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।
Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)
निर्देशानुसार उचित उत्तर चुनकर लिखिए। (केवल तीन प्रश्न)
Choose the appropriate answer and write as directed. *3×1=3*
(Only three questions)

(i) 'भारते हरितक्रान्त्या औद्योगिकीकरणेन च विकासचक्रं तीव्रतया अचलत् ? अत्र 'अचलत्' इति क्रियापदस्य कर्तृपदं किम् ?

(A) विकासचक्रम् (B) भारते
(C) हरितक्रान्त्या (D) तीव्रतया

(ii) 'भारतवर्ष: 1947 तमे वर्षे स्वतन्त्र: अभवत्' अत्र 'परतन्त्र:' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(A) भारतवर्ष: (B) स्वतन्त्र:
(C) अभवत् (D) वर्षे

(iii) '2047 वर्षं यावत् भारतवर्ष: विकसितानां देशानां श्रेण्यां भवेत्' अत्र विशेषणपदं किम् ?

(A) श्रेण्याम् (B) भारतवर्ष:
(C) विकसितानाम् (D) देशानाम्

(iv) 'सर्वकारेण भारतस्य विकासाय क्रमबद्धा: लक्ष्या: निर्धारिता:' अत्र 'प्रगत्यै' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

(A) विकासाय (B) लक्ष्या:
(C) सर्वकारेण (D) निर्धारिता:

**खण्डः 'ख'**

**रचनात्मक-कार्यम्** *10 अङ्काः*

**रचनात्मक कार्य**

**Writing Skills**

2. (क) भवता/भवत्या गतमासे जयपुरनगरं दृष्टम्। अस्य नगरस्य सांस्कृतिकम् ऐतिहासिकञ्च वैशिष्ट्यं वर्णयन्/वर्णयन्ती देहरादूनवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत।

आपने गत माह जयपुर नगर देखा। इस नगर की सांस्कृतिक और ऐतिहासिक विशेषताओं का वर्णन करते हुए देहरादूनवासी अपने मित्र को मञ्जूषा में दिए गए संकेतों की सहायता से एक पत्र लिखिए।

You have seen Jaipur city last month. Write a letter to your friend who lives in Dehradun explaining its cultural and historical features with the help of the clues given in the box. *5*

**मञ्जूषा**

| |
|---|
| मम मित्रम्, नमोनमः, गतमासे, राजस्थानस्य, भवति, अधुना अगच्छम्, सौन्दर्यम्, आमेरदुर्गम्, पूजास्थानानि, सन्ति, नृत्यम्, संस्कृतिः, भोजनम्, विशिष्टता, अस्ति, भवान्, दृष्टम्, सांस्कृतिकम्, जन्तरमन्तरम्, स्वस्ति, प्रणामः, अस्तु। |

**अथवा (OR)**

(ख) स्वविद्यालयस्य छात्राणां कृते श्लोकावृत्ति-प्रतियोगितायाः आयोजनाय स्वविद्यालयस्य प्रधानाचार्यं प्रति पत्रमेकं लिखत।

अपने विद्यालय के छात्रों के लिए श्लोकावृत्ति प्रतियोगिता के आयोजन के लिए अपने विद्यालय के प्रधानाचार्य को एक पत्र लिखिए।

Write a letter to the Principal of your school for organizing Sloka-Recitation competition for the students of your school. *5*

**मञ्जूषा**

| |
|---|
| सेवायाम्, श्रीमन्तः, प्रधानाचार्यः, संस्कृतम्, छात्राः, संस्कृतस्य प्रसाराय, अस्माकं मध्ये, छात्रमेलनम्, सन्ति, उल्लासिताः, अस्ति, निवेदनम्, आयोजनम्, आज्ञाकारी, धन्यवादाः, सुमधुरम्, आनन्दम्, भवतु, इति। |

3. (क) प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत।
प्रदत्त तथ्यों की सहायता से निम्नलिखित विषय पर संस्कृत में अनुच्छेद लिखिए।
Write a passage on the topic given below with the help of the given facts in Sanskrit. *5*

विषय: – मम प्रिय: कवि:

भारतवर्षे, प्रसिद्धा:, अनेके, कालिदास:, कविकुलगुरु:, एतस्य रचना:, नाटकम्, काव्यानि, मेघदूतम्, सन्ति, आदरम्, भवति, जनै:, विश्वे प्रसिद्धम्, अभिज्ञानशाकुन्तलम्, दुष्यन्त:, यस्य, माधुर्यम्, आनन्दमग्ना:, उपमा कालिदासस्य।

**अथवा (OR)**

(ख) अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत।
निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए।
Translate any **five** of the following sentences into Sanskrit. *5×1=5*

(i) कछुआ धीरे-धीरे चलता है।
The tortoise walks slowly.

(ii) सभी लोगों को प्रेम से रहना चाहिए।
All people should live with love.

(iii) वे सब गाने पर नाच रहे हैं।
They are dancing on the song.

(iv) राम ने कलम से पिता को पत्र लिखा।
Ram wrote a letter to his father with a pen.

(v) सभी छात्रों ने पाठ याद कर लिया।
All students have learnt the lesson.

(vi) सीमा पर सैनिकों ने शत्रुओं से देश की रक्षा की।
Soldiers protected the country from enemies on the border.

(vii) कोयल मधुर स्वर में कूज रही है।
The cuckoo is singing in a sweet voice.

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम्

## अनुप्रयुक्त व्याकरण

## Applied Grammar

*15 अङ्काः*

4. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों की सन्धि अथवा सन्धि-विच्छेद करके लिखिए।

(केवल तीन प्रश्न)

Write the Sandhi form or disjoin the Sandhi of the underlined words in the following sentences. (Only three questions) *3×1=3*

(क) काऽपि विशिष्टा जिज्ञासा अस्ति किम् ?

(ख) क्षणे-क्षणे हयस्य खुरा: + चिक्कण-पाषाणखण्डेषु प्रस्खलन्ति।

(ग) न जगति किञ्चित् + अस्ति ।

(घ) पठितमेव युष्माभिरपि तत्काण्डम्।

5. रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)

रेखांकित पदों के प्रकृति और प्रत्यय को जोड़कर अथवा विभक्त कर उचित उत्तर चुनकर लिखिए।

(केवल तीन प्रश्न)

Select the appropriate answer by joining or disjoining the base element and the suffix element in the underlined words. (Only three questions) *3×1=3*

(i) यतस्त्वया ज्ञानमशेषम् आप्तम्।

(A) अप् + क्त

(B) आप् + क्त

(C) अप् + तुमुन्

(D) अप् + क्त्वा

(ii) अयि जात <u>कथयितव्यम्</u> कथय।

(A) कथ् + ल्यप्

(B) कथय + टाप्

(C) कथ् + ङीप्

(D) कथ् + तव्यत्

(iii) असक्तो हि <u>आचरन्</u> कर्म पुरुष ...।

(A) आ + चर् + शतृ

(B) आ + चर् + टाप्

(C) आचर् + शानच्

(D) आ + चर् + तुमुन्

(iv) तत्किम् <u>अक्षत्रिया</u> पृथिवी ?

(A) अक्षत्रिय + टाप्

(B) अक्षत्रिय + ङीप्

(C) अक्षत्रिय + क्तवतु

(D) अक्षत्रिय + अनीयर्

**6.** मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)
मञ्जूषा में दिए गए समुचित अव्यय पदों से रिक्त स्थान भरकर वाक्य लिखिए। (केवल तीन प्रश्न)
Write the sentence after filling in the blanks with the appropriate indeclinable words given in the box. (Only three questions) *3×1=3*

(क) _________ कक्षा विशेषरूपेण सुसज्जिता अस्ति।

(ख) लब्धापि _________ दुःखेन परिपाल्यते ।

(ग) स विक्रमो राजा _________ स्वमनसि अचिन्तयत् ।

(घ) _________ च विप्रत्ययः तत्पृच्छत ।

**मञ्जूषा**

| |
|---|
| यदि, एकदा, खलु, अद्य। |

**7.** कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)

कोष्ठक में दिए गए शब्दों में उचित विभक्ति का प्रयोग कर रिक्त स्थान पूर्ण कीजिए। (केवल तीन प्रश्न)

Fill in the blanks after applying the appropriate case-endings in the words given in the brackets. (Only three questions) *3×1=3*

(क) अलं _________ एकैकं कृत्वा बोधयामि। (चिन्ता)

(ख) तस्मै _________ व्ययार्थं रत्नचतुष्टयं दास्यामि। (राजन्)

(ग) स्वराज्यं _________ प्रति गमनाय इच्छां न प्रकटितवान्। (केरल)

(घ) पुनरपि राजा _________ समुपवेष्टुं गच्छति। (सिंहासन)

**8.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के समुचित विग्रह अथवा समास चुनकर लिखिए। (केवल तीन प्रश्न)

Write the vigraha (the descriptive sentence) or the compound of the underlined words of the following sentences. (Only three questions) *3×1=3*

(i) प्रतिदिनम् योगकक्षा प्रचलिष्यति।

(A) प्रति दिनम्

(B) दिनम् प्रति

(C) दिनं दिनं प्रति

(D) दिनं प्रति प्रति

(ii) श्रुतप्रकाशं यशसाप्रकाश: प्रत्युज्जगामातिथिमातिथेय: ।

(A) श्रुतात् प्रकाशम्

(B) श्रुतस्य प्रकाशम्

(C) श्रुतेन प्रकाशम्

(D) प्रकाशेन श्रुतम्

(iii) गुरूपदेश: अजलं स्नानम् ।

(A) जलेन स्नानम्

(B) न स्नानम्

(C) न जलम्

(D) न जलेन

(iv) अकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत् ।

(A) मेघस्य माला

(B) मेघानां माला

(C) मेघात् माला

(D) मेघा: माला:

## खण्डः 'घ'

## (i) पठितावबोधनम्

25 अङ्का:

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following passage and answer the following questions in Sanskrit. *5*

भवादृशा एव भवन्ति भाजनानि उपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणा:। हरति अतिमलिनमपि दोषजातं गुरूपदेश:। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टार:। राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न शृण्वन्ति। अवधीरयन्त: खेदयन्ति हितोपदेशदायिनो गुरून्।

**प्रश्ना:**

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) के विरला: भवन्ति ?

(ii) उपदेशगुणा: कुत्र विशन्ति ?

(iii) जन: कस्मात् राजवचनमनुगच्छति ?

(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए। (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) गुरूपदेश: कं हरति ?

(ii) किम् अजलं स्नानं भवति ?

(iii) जना: कथं गुरून् खेदयन्ति ?

(इ) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए। (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'जन:' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'अपगतमले' इति विशेषणपदस्य विशेष्यपदं किम् ?

(iii) 'दोषा:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।
Read the following poetry and answer the questions based on them in Sanskrit. *5*

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।

**प्रश्ना:**

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) कस्य विद्या समाप्ता जाता ?

(ii) अस्मिन् पद्ये महर्षि: क: अस्ति ?

(iii) कौत्स: किमर्थं रघो: समीपम् अगच्छत् ?

(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए। (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) कौत्सस्य भक्ति: कीदृशी आसीत् ?

(ii) महर्षि: गुरुदक्षिणायां किम् अगणयत् ?

(iii) कौत्सेन महर्षि: किमर्थं विज्ञापित: ?

(इ) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए। (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'अगणयत्' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'अध्यापक:' इति पदस्य किं पर्यायपदमत्र प्रयुक्तम् ?

(iii) 'आरम्भ:' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।
निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।
Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*लव:* : दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्व:।

*बटव:* : कथं ज्ञायते ?

*लव:* : ननु मूर्खा:। पठितमेव युष्माभिरपि तत्काण्डम्। किं न पश्यथ ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार:। यदि च विप्रत्ययस्तत्पृच्छत।

*बटव:* : भो भो: किं प्रयोजनोऽयमश्व: परिवृत: पर्यटति ?

**प्रश्ना:**

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) के अश्वं परित: पर्यटन्ति ?

(ii) अश्व: कीदृशोऽस्ति ?

(iii) 'दृष्टमवगतं च' इति क: वदति ?

(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए। (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) बटव: रक्षकान् किं पृच्छन्ति ?

(ii) रक्षितार: कीदृशा: सन्ति ?

(iii) अश्वं दृष्ट्वा लव: किं वदति ?

(इ) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए। (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'सैनिका:' इति पदस्य किं पर्यायपदमत्र प्रयुक्तम् ?

(ii) 'पर्यटति' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'अस्माभि:' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

**12.** अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए। (केवल चार प्रश्न)
Form questions on the basis of underlined words in the following sentences. (Only four questions) *4×1=4*

(क) दृढ़संकल्प: शिववीरचर: स्वकार्यात् न विरमति।

(ख) चन्द्रापीड: ताभि: उपदेशवाग्भि: प्रीतहृदय: स्वभवनम् आजगाम।

(ग) कौतूहलवशात् श्रीदास: तत्पत्रम् उद्घाटितवान्।

(घ) उपार्जितां वित्तं दानभोगै: विना सफलं न भवति।

(ङ) कर्मणैव हि जनकादय: संसिद्धिम् आस्थिता:।

**13.** अधोलिखितस्य श्लोकस्य अन्वयं लिखत।
निम्नलिखित श्लोक का अन्वय लिखिए।
Write the prose order of the following verse. *3*

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्त: समाचरन् ।।

**14.** अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।

निम्नलिखित श्लोक का भावार्थ संस्कृत भाषा में लिखिए।

Write the explanation of the following verse in Sanskrit. *3*

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा: ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।

**अथवा (OR)**

'कर्मगौरवम्' इति पाठस्य सारं सङ्क्षेपेण संस्कृतभाषया लिखत।

'कर्मगौरव' पाठ का सार संक्षेप में संस्कृत में लिखिए।

Write briefly the summary of lesson 'कर्मगौरवम्' in Sanskrit.

**खण्ड: 'घ'**

**(ii) संस्कृत-साहित्येतिहासस्य सामान्य: परिचय:** ***10 अङ्का:***

**संस्कृत साहित्य और इतिहास का सामान्य परिचय**

**General Introduction of Sanskrit-Literature and History**

**15.** अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर दिए गए विकल्पों में से चुनिए। (केवल तीन प्रश्न)

Choose the answer from the given options of the following questions. (Only three questions) *3×1=3*

(i) अधोलिखितेषु महाकाव्येषु कालिदासस्य काव्यं किम् ?

(A) कुमारसम्भवम् (B) किरातार्जुनीयम्

(C) रावणवधम् (D) बुद्धचरितम्

(ii) 'आदिकवि:' इति नाम्ना क: प्रसिद्ध: ?

(A) भास: (B) भारवि:

(C) वाल्मीकि: (D) वेदव्यास:

(iii) 'रामायणमञ्जरी' इति महाकाव्यस्य रचियता कः ?

(A) माघः (B) भट्टिः

(C) क्षेमेन्द्रः (D) अश्वघोषः

(iv) कल्हणस्य काव्यस्य नाम किम् ?

(A) विक्रमांकदेवचरितम् (B) राजतरंगिणी

(C) कीर्तिकौमुदी (D) वृहत्कथामञ्जरी

**16.** अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर दिए गए विकल्पों में से चुनिए। (केवल तीन प्रश्न)

Choose the answer from the given options of the following questions. (Only three questions) *3×1=3*

(i) 'दशकुमारचरितम्' इति गद्यकाव्यस्य रचियता कः ?

(A) सुबन्धुः (B) दण्डी

(C) बाणभट्टः (D) क्षमारावः

(ii) धनपालस्य काव्यस्य नाम किम् ?

(A) कथामुक्तावली (B) तिलकमञ्जरी

(C) वासवदत्ता (D) कादम्बरी

(iii) 'नलचम्पू' इति चम्पूकाव्यस्य रचियता कः ?

(A) दण्डी (B) त्रिविक्रमभट्टः

(C) अनन्तभट्टः (D) भोजः

(iv) अम्बिकादत्तव्यासः किं काव्यम् अरचयत् ?

(A) उदयसुन्दरीकथा (B) कथामुक्तावली

(C) तिलकमञ्जरी (D) शिवराजविजयम्

**17.** प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए। (केवल चार प्रश्न)

Choose appropriate answer from the given options. (Only four questions)

*4×1=4*

(i) अधोलिखितनाटकेषु किं नाटकं रामायणाश्रितम् अस्ति ?

(A) मध्यमव्यायोग: (B) मालविकाग्निमित्रम्

(C) वेणीसंहारम् (D) प्रतिमानाटकम्

(ii) 'मुद्राराक्षसम्' इति नाटकस्य रचियता क: ?

(A) शूद्रक: (B) कालिदास:

(C) अश्वघोष: (D) श्रीहर्ष:

(iii) भट्टनारायणरचिस्य नाटकस्य नाम किम् ?

(A) कर्णभारम् (B) मृच्छकटिकम्

(C) वेणीसंहारम् (D) अभिषेकनाटकम्

(iv) दुष्यन्त: कस्य नाटकस्य नायक: अस्ति ?

(A) मुद्राराक्षसस्य (B) अभिज्ञानशाकुन्तलस्य

(C) प्रतिमानाटकस्य (D) स्वप्नवासवदत्तस्य

(v) भवभूते: नाटकस्य नाम किम् ?

(A) उत्तररामचरितम् (B) विक्रमोर्वशीयम्

(C) रत्नावली (D) वेणीसंहारम्

## खण्डः 'ङ'

## छन्दोऽलङ्कारपरिचयः

**10 अङ्काः**

## छन्द और अलंकार परिचय

## Metres and Figures of Speech

**18.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर दीजिए। (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) तगणस्य संक्षिप्त-चिह्नानि कानि सन्ति ?

(ii) 'वंशस्थ' छन्दसि प्रतिचरणं कति वर्णाः भवन्ति ?

(iii) उपेन्द्रवज्राछन्दसः उदाहरणमेकं लिखत।

(iv) 'ननमयययुतेम्' इति कस्य छन्दसः लक्षणमस्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत। (केवलं प्रश्नद्वयम्)

निम्नलिखित श्लोक पंक्तियों में छन्द पहचानकर नाम लिखिए। (केवल दो प्रश्न)

Write the name of the metre in the following lines of the verses. (Only two questions) *2×1=2*

(i) निःशेषविश्राणितकोषजातम्।

(ii) मनो मे संमोहस्थिरमपि हरत्येष बलवान्।

(iii) पापान्निवारयति योजयते हिताय।

**19.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर दीजिए। (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) रूपक-अलङ्कारस्य लक्षणं लिखत।

(ii) अनुप्रास-अलङ्कारस्य लक्षणं लिखत।

(iii) उपमालङ्कारस्य उदाहरणम् एकम् लिखत।

(iv) 'श्लिष्टैः पदैरनेकार्थाभिधाने ...' इति कस्य अलङ्कारस्य लक्षणम् ?

(आ) अधोलिखितासु पङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं प्रश्नद्वयम्)

निम्नलिखित पंक्तियों में प्रयुक्त अलंकार का नाम लिखिए। (केवल दो प्रश्न)

Write the figure of speech in the following lines. (Only two questions) *2×1=2*

(i) यदि नो सन्ति सन्त्येव केयमद्य विभीषिका।

(ii) निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।

(iii) महातमसेन ग्रस्यमानानामिव सत्त्वानां क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगनतलम्।